International Journal of
**Multidisciplinary Educational Research**

ISSN: 2277-7881, Impact Factor: 6.014
Index Copernicus Value: 5.16
International Scientific Indexing Value: 2.286
Research Unique Number:17.7.2013.49
Visakhapatnam-530 016, Andhra Pradesh-India
Email: victorphilosophy@gmail.com

# *Certificate of Publication*

Date: APRIL 2019

Dear Author(s) A. SUDHAMA VAMSI

It is indeed our pleasure to inform you that your article titled "...... उपासनाभक्तिः ......" has been published in our Peer Reviewed and Referred International Journal of Multidisciplinary Educational Research (IJMER) Volume: 8, Issue: 4 (1), ...APRIL.......(Month), 2019,Page Nos...34...to ...37... with JISRAF Impact Factor 6.014, Index Copernicus Value 5.16 & International Scientific Indexing Value: 2.286 of IJMER Published by Sucharitha Publications, Visakhapatnam.

Sincerely Yours

Dr. K. VICTOR BABU
Editor-in-Chief
International Jornal of Multidisciplinary Educational Research-ISSN: 2277-7881
Visakhapatnam-530 003, A.P-India

2277 - 7881

# उपासनाभक्तिः
# (SPCIAL REFERENSES FROM SRIMAD BHAGAVATGITHA)

**Dr. Asavadi Sudhama Vamsi**
Principal (Fac) & Sr. Lecturer in Sanskrit
Matrusri Oriental College
Jillellamudi, Bapatla
Guntur, Andhra Pradesh

"***भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृति स्तथा***" इत्यभियुक्तोक्तिमाधारीकृत्य संस्कृतभाषा, संस्कृतिः च भारतदेशस्य प्रतिष्ठा प्रदायिन्यौ इति निश्चप्रचं वचः। देवता व्यवहारयोग्यत्वात् संस्कृतभाषा देवभाषा इत्यभिप्रथिता। दिव् धातोः द्योतनमित्यर्थः। कस्य द्योतनं इत्याकांक्षायाम् आत्मसंस्कारद्योतनमिति समाधेयम्। यतोहि "***वाण्येका समलंङ्करोति पुरुषं या संस्कृता धार्यते***", "***वाक् वैदोग्ध्री***"--------"***धेनुर्वागिस्मान् उपसुष्टुतैतु***" इत्यादि प्रामाण्यवचनानि संस्कृतभाषायाः, संस्कृतेश्च अविनाभावसम्बन्धं ख्यापयन्ति।

वैदिककालादारभ्य आधुनिककालपर्यन्तं संस्कृतभाषा गंङ्गादिपुण्यजीवनदीव आसंसारम् अस्मान् पुनाति। एतादृश महत्वपूर्णायाः संस्कृतभाषायाः उज्जीवनाय, परिरक्षणाय बद्धपरिकरास्ताः महाभागाः नित्यस्मरणीयाः भवन्ति वाल्मीकिव्यासादयः तेषां प्राञ्जलिं समर्प्य-- अमरवाणी संस्कृतभाषा प्राचीना सुमनोहरा च। वेदकालादारभ्य तस्याः प्राचुर्यम् अनुपमम् अमेयञ्च। प्रभुसम्मिताः वेदाः उपनिषदः, मित्रसम्मितानि पुराणानि, शास्त्राणि, कान्ता- सम्मितानि, काव्यानि, मनोरञ्जकानि नाटकानि संस्कृत भाषायां विद्यमानाः समधिकं प्रसिद्धं गताः एव। प्राचीने काले समग्र मानव निर्माण विकासादिकं च संस्कृते एव निहितमासीत्।

विद्या (लौकिक, पाकलौकिक विद्या) – वैद्य – विमान – वाणिज्य अर्थशास्त्रादि विज्ञान विषयास्सर्वे संस्कृतभिक्षया पृथिवीमिमां प्राप्ताः। "**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृति स्तथा**" इत्यनया आर्योक्त्या अस्माकं भारतदेशस्य प्रतिष्ठादायिनी भाषा संस्कृतभाषा एवेति ज्ञायते। गच्छति काले शास्त्रीया दिव्या एषा सुन्दरभाषा महाराजानामास्थानपदवीमलङ्कृता सकल जनमनोरञ्जन कारणभूता सञ्जाता। प्रान्तीय भाषाणां निर्माणे तासामभिवृद्धौ च अन्तर्वाहिनी भूत्वा तासु सजीवतामानाय्य **जननीं बहुभाषाणाम्** इति अप्रतिहतां ख्यातिमाप्ता।

भारतस्य प्रतिष्टे द्वे संस्कृतं संस्कृति स्तथा इत्येतां आर्योर्तिं श्रृत्वा कस्य भारतीयस्य मनसि वेदः, उपनिषदः, रामायणः,महाभारतस्य च स्मृतिः न जायते। महाभारतस्य कर्ता व्यासः। अयंमेव विष्णुरूपः इति अनया उक्त्या ज्ञायते।

**व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।**

**नमो वै ब्रह्मनिधये वासिश्टाय नमो नमः।। ( विष्णु सहस्रनामम् )**

श्रीमहाविष्णुः एव व्यासरूपमाश्रित्य अज्ञानान्धकारे पतितान् जनान् उद्धर्थुम महाभारतस्थित श्रीमद्भगवद्गीतोपदेशेन प्रायतत। श्रीकृष्णार्जुन संवादरूपेण गीतोयं उपलभ्यते।

**भक्ति इत्येतपदं भज्(सेवायां) इति धातोः क्तिन् प्रत्ययेन** सिद्धयति। भक्तिरित्युक्ते –

**अन्याभिलिषिता शून्यं ज्ञानकर्माध्यनावृतम्।**

**अनुकूल्येन कृष्णानुशीलना भक्तिकुत्तमा।। (भक्तिरसामृतम्)**

फलकांङ्श्रां विना ज्ञानकर्मादीनां आश्रयं च विना अनुकूलमार्गमाश्रित्य प्रीतिपूर्वकं ध्यानस्य करणमेव भक्तिरिति भक्तिरसामृतेन ज्ञायते। भक्त्या विषये श्रीकृष्णः गीतायां इत्थं निगदति

**अपि चेत्सुदुराचारो भजते मामनन्यभाक्।**

**साधुरेव स मन्तव्यः सम्यस्व्यवसितो हिसः।।**

**क्षिप्रं भवति धर्मात्मा शशच्छान्तिं निगच्छति।**

**कौन्तेय प्रतिजानाहि नमे भक्तः प्रणश्यति।।**

**मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।**

**स्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परांगतिम्।।**

**(भगवद्गीता 9,30,31)**

अर्थात् भक्तिमार्गे सर्वेषां अधिकारः। भगवदनुग्रहेण जनन मरणरूप संसारात्,मुक्तिः संभवतीति ये जनाः मन्यन्ते ते सर्वेऽपि भक्तिसूत्राणि पठन्तः भगवद् भक्तिमार्गं अनुसरन्तः मोक्षाय योग्याः भवन्ति।

भक्तिमार्गानुसरनाय कस्यापि वर्णस्य जनः योग्याः एव इति श्रीकृष्णः एव प्रोवाच। एतदेव शाण्डिल्यमहर्षिरपि इत्थं अवर्ण्यत्। **अनिद्या योनि अधिक्रियते पारं पर्यात् सामान्यवत्** इति।

वर्ण्यमाना भक्तिः नवधा - **श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**

**अर्चनं वन्दनं दास्यं सख्यमात्म निवेदनम्।।**

भक्तिरेव सेवारूपा उपासनारूपा च। सेवा भक्तिं वर्ण्यन् कूलशेखरः मुकुन्दमालायां वक्ति।

**तत्भृत्यभृत्यपरिचारकभृत्यभृत्या।**

**भृत्यस्य भृत्य इति मां स्मरलोकनाथ।।( मुकुन्दमाला) - कुलशेखरः**

उपरिश्लोकस्थं विषयं शुकमहर्षि प्रोक्तेस्मिन् श्लोके अवगन्तुं शक्नुमः।

**किरातहूणान्ध्र पिलिन्द पुल्कसा। आभीरकङ्का यवनाः कषादयः।**

**ये ।न्ये च पापा यदुपाश्रयाश्रयाः। शुध्यन्ति तस्मै प्रभविष्णवे नमः।।**

अर्थात् किराताः, हूणाः, आन्ध्राः, पुलिन्द्राः,पुल्कसः,आभिरः,कङ्क, यवणा,कषादयः एतेसर्वे पि जन्मना महापापाः सन्तोपि यदि भगवद्भक्तिं कुर्वन्तःस्युः चेत् अहं तेषां पादान् नमस्कृत्य पुनीयः भवामि किमर्थमितिचेत् भो देव विष्णो तव भक्तान् प्रति कृतः नमस्कारः त्वां प्रति कृता च सेवा एव।

केचन भक्ताः वैर भक्तिद्वारा, द्वेषभक्ति द्रारा वा मोक्षमवाप्नुवन् इति

**यत्र यत्र मनोदेहि धारयेत् सकलं धिया।**

**स्नेहाद् द्वेषाद् भयाद् वापि यापि तत्तत्सुरुपताम्।।**

**भगवते गद्यम् वैरेण यं नृपतयः शिशुपाल पौण्ड्र साल्वादया, गतिविलास विलोकनाद्यैः। ध्यायन्त आकृतिधियः शय वासनादौ तत्साम्यमापुरनु रक्तिधियां पुनः किम्।।** इति वचनेन सकलसंशयाः निवर्त्यन्ते।

अनेन वचनेन वयं जानीमः यत् शिशुपालः,पौण्ड्रराजः, शालवः इत्यादयः भगवन्तं द्विषन्तःमोक्षं अवाप्नुवन्। कथमितिचेत् एते सर्वस्थितिषु कृष्णः शतृरिति भावयन्तः आसन्। सततं कृष्णं प्रति कृत निन्दारूपाध्यानेन उत्तम पदं अलभन्त। उपासना भक्तिः पञ्चधा –

**1. आसुरोपासना**

**2.देवर्षिपित्रोपासना**

**3.अवतारोपसना**

**4.सगुणब्रह्मोपासना**

**5. निर्गुण ब्रह्मोपासन।**

**1.आसुरोपासना** - तत्र आसुरोपासनायां क्षुद्रदेवता यक्ष,राक्षस,भूत, प्रेतादीनामुपासना जायते।

**2.देवर्षि पित्रोपासना** – देवर्षि पितृ उपासनायाम् अष्टवत्सु, द्वादशादित्य, एकादशरुद्र, इन्द्र, प्रजापति संज्ञकानां त्रिंशत्संख्याकानां नित्यानां मूलदेवतानां तदितिरिक्तां च त्रिशतकोटि संख्याकानां नैमित्तिक देवतानां सप्तानां ब्रह्मर्षि, देवर्षि, महर्षि, परमर्षि, काण्डर्षि, श्रुतर्षि,राजर्षिणां नित्यनैमित्तिक पितृणां च उपासना क्रियते।

**3.अवतारोपासना** - अवतारोपासनायां रामकृष्णादीनां भगवदवताराणां भगवत्साधना, अवतारोपासना हि नवविध भक्ति द्वारा सम्यके जायते। निष्काम भक्ति द्वारा क्रियमाणोपासना कैवल्यप्रदा भवति सकामभक्त्या च वधीयमानोपासना सामीप्य, सालोक सारूप्य सायुज्यमुक्तिदायिनी जायते।

**4.साकारोपासना** - सगुण ब्रह्मोपासना पाञ्चानां विष्णु, शिव, शक्ति, सूर्य गणमिति देवानां मूर्थिपूजा ध्यान जपादिभिः सम्पद्यते।

**5. निराकारोपना** - आपाणिपादो जवनो गृहीता पश्यत्य चक्षुः स श्रृणोत्यकर्णः नवेत्ति वेद्यां न च तस्यास्तित्वेन तमाहुरग्रन्थं पुरुषम्। ( श्वेताश्वतरोपनिषत् 3-16)

एवं विध उपानसा भक्तिरपि मानवकल्याणाय भवति। भक्तिमुद्धिश्य हिन्दू संप्रदायानां मतानि यदा भक्तः भगवतः भक्त्यां तन्मयत्वं आप्नोति तदा भक्त भगवतोः अभेदः भावः भवति।

हिन्दू – इतर संप्रदायानां ग्रन्थेष्वपि भक्ति विषयमुद्धिश्य विविधानि मतानि प्राप्यन्ते अत्र तानि प्रदर्श्यन्ते।

**1.सूफीमतम्** – अयं मते एकया घटनया भक्ति वर्ण्यते। अत्र भक्त भगवतो अभेद भावः उच्यते। एकः कामुकः स्वप्रययाः वासगृहं अगमत् द्वारे च ध्वनिमकरोत् आगमनसूचनामादातुम् अभ्यन्तर सः प्रिया अपृच्छत् द्वारे कः कामुकः अहिं इति अवदत्। पुनः स एव प्रश्नः प्रियया अक्रियता अस्य च उत्तरं पुनस्तदेव अभवत् अहं इति पुनश्च कः इति प्रश्ने कृते कामुकः तन्मयतया त्वमेवाहॆ इति अवदन् तन्मयभावेन भक्तिरसपरिपूर्णः भगवद्भावमवाप्नोत्।

**2.क्रिस्तोः मतम्** – अहं मम जनकश्च उभौ पृथकत्वेन न स्वः। आवयोः एकत्वम् इति ईसा वदति।

**3.मोहमदमतम् – इननि- अन् – अल्लाकुला** इति महम्मदः अवद्त्। अस्यायं अर्थः अहमेव भगवान् मत् पृथक् भगवान् नास्तीति।

एवं भगवन्तं साधाद्वारा,उपासना द्वारा, सेवाद्वारा भक्ति सादनैः प्राप्य मोक्षः प्राप्यते भक्तेव।

**उपयुक्तग्रन्थाः -**

1. **विष्णुसहस्रनामम्**
2. **मुकुन्दमाला**
3. **भगवद्गीता**
4. **भक्ति रसामृतम्**
5. **संस्कृत साहित्य चरित्र**